# ShrI Laxmi Kavacham 2

# શ્રીલક્ષ્મીકવચમ્ ૨

## Document Information

Text title : laxmI kavacham 2 brahmastotram

File name : laxmikavacham2.itx

Category : kavacha, devii, lakShmI, devI

Location : doc_devii

Author : shukaM prati brahmovaacha

Transliterated by : K S Ramachndran <ksrkal at dataone.in>

Proofread by : K S Ramachndran <ksrkal at dataone.in>

Description-comments : Encoded from DevIstotraratnAkaram in Telugu script

Latest update : July 10, 2009

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2025

*sanskritdocuments.org*

# ShrI Laxmi Kavacham 2

# શ્રીલક્ષ્મીકવચમ્ ૨

શુકં પ્રતિ બ્રહ્મોવાચ
Efficacy of the kavacham
મહાલક્ષ્મ્યાઃ પ્રવક્ષ્યામિ કવચં સર્વકામદમ્ ।
સર્વપાપપ્રશમનં દુષ્ટવ્યાધિવિનાશનમ્ ॥ ૧॥

ગ્રહપીડાપ્રશમનં ગ્રહારિષ્ટપ્રભઞ્જનમ્ ।
દુષ્ટમૃત્યુપ્રશમનં દુષ્ટદારિદ્ર્યનાશનમ્ ॥ ૨॥

પુત્રપૌત્રપ્રજનનં વિવાહપ્રદમિષ્ટદમ્ ।
ચોરારિહં ચ જપતાં અખિલેપ્સિતદાયકમ્ ॥ ૩॥

સાવધાનમના ભૂત્વા શ્રુણુ ત્વં શુક સત્તમ ।
અનેકજન્મસંસિદ્ધિલભ્યં મુક્તિફલપ્રદમ્ ॥ ૪॥

ધનધાન્યમહારાજ્યસર્વસૌભાગ્યકલ્પકમ્ ।
સકૃત્સ્મરણમાત્રેણ મહાલક્ષ્મીઃ પ્રસીદતિ ॥ ૫॥

Head-to-Toe description of Shri Laxmi
ક્ષીરાબ્ધિમધ્યે પદ્માનાં કાનને મણિમણ્ટપે ।
તન્મધ્યે સુસ્થિતાં દેવીં મનીષાજનસેવિતામ્ ॥ ૬॥

સુસ્નાતાં પુષ્પસુરભિકુટિલાલકબન્ધનામ્ ।
પૂર્ણેન્દુબિમ્બવદનાં અર્ધચન્દ્રલલાટિકામ્ ॥ ૭॥

ઇન્દીવરેક્ષણાં કામકોદણ્ડભ્રુવમીશ્વરીમ્ ।
તિલપ્રસવસંસ્પર્ધિનાસિકાલઙ્કૃતાં શ્રિયમ્ ॥ ૮॥

કુન્દકુડ્મલદન્તાલિં બન્ધૂકાધરપલ્લવામ્ ।
દર્પણાકારવિમલકપોલદ્વિતયોજ્જ્વલામ્ ॥ ૯॥

રત્નતાટઙ્કકલિતકર્ણદ્વિતયસુન્દરામ્ ।

માઙ્ગલ્યાભરણોપેતાં કમ્બુકણ્ઠીં જગત્પ્રિયામ્ ॥ ૧૦॥

તારહારિમનોહારિકુચકુમ્ભવિભૂષિતામ્ ।
રત્નાઙ્ગદાદિલલિતકરપદ્મચતુષ્ટયામ્ ॥ ૧૧॥

કમલે ચ સુપત્રાઢ્યે હ્યભયં દધતીં વરમ્ ।
રોમરાજિકલાચારુભુગ્નનાભિતલોદરીમ્ ॥ ૧૨॥

પત્તવસ્ત્રસમુદ્ભાસિસુનિતંબાદિલક્ષણામ્ ।
કાઞ્ચનસ્તમ્ભવિભ્રાજદ્વરજાનૂરુશોભિતામ્ ॥ ૧૩॥

સ્મરકાહ્લિકાગર્વહારિજંભાં હરિપ્રિયામ્ ।
કમઠીપૃષ્ઠસદૃશપાદાબ્જાં ચન્દ્રસન્નિભામ્ ॥ ૧૪॥

પઙ્કજોદરલાવણ્યસુન્દરાઙ્ઘ્રિતલાં શ્રિયમ્ ।
સર્વાભરણસંયુક્તાં સર્વલક્ષણલક્ષિતામ્ ॥ ૧૫॥

પિતામહમહાપ્રીતાં નિત્યતૃપ્તાં હરિપ્રિયામ્ ।
નિત્યં કારુણ્યલલિતાં કસ્તૂરીલેપિતાઙ્ગિકામ્ ॥ ૧૬॥

સર્વમન્ત્રમયાં લક્ષ્મીં શ્રુતિશાસ્ત્રસ્વરૂપિણીમ્ ।
પરબ્રહ્મમયાં દેવીં પદ્મનાભકુટુંબિનીમ્ ।
એવં ધ્યાત્વા મહાલક્ષ્મીં પઠેત્ તત્કવચં પરમ્ ॥ ૧૭॥

ધ્યાનમ્ ।
એકં ન્યંચ્યનતિક્ષમં મમપરં ચાકુંચ્યપદાંબુજં
મધ્યે વિષ્ટરપુણ્ડરીકમભયં વિન્યસ્તહસ્તામ્બુજમ્ ।
ત્વાં પશ્યેમ નિષેદુષીમનુકલંકારુણ્યકૂલંકષ-
સ્ફારાપાઙ્ગતરઙ્ગમમ્બ મધુરં મુગ્ધં મુખં બિભ્રતીમ્ ॥ ૧૮॥

અથ કવચમ્ ।
મહાલક્ષ્મીઃ શિરઃ પાતુ લલાટં મમ પઙ્કજા ।
કર્ણે રક્ષેદ્રમા પાતુ નયને નલિનાલયા ॥ ૧૯॥

નાસિકામવતાદંબા વાચં વાગ્રૂપિણી મમ ।
દન્તાનવતુ જિહ્વાં શ્રીરધરોષ્ઠં હરિપ્રિયા ॥ ૨૦॥

ચુબુકં પાતુ વરદા ગલં ગન્ધર્વસેવિતા ।
વક્ષઃ કુક્ષિં કરૌ પાયૂં પૃષ્ઠમવ્યાદ્રમા સ્વયમ્ ॥ ૨૧॥

કટિમૂરુદ્વયં જાનુ જઘં પાતુ રમા મમ ।
સર્વાઙ્ગમિન્દ્રિયં પ્રાણાન્ પાયાદાયાસહારિણી ॥ ૨૨॥

સપ્તધાતૂન્ સ્વયં ચાપિ રક્તં શુક્રં મનો મમ ।
જ્ઞાનં બુદ્ધિં મહોત્સાહં સર્વં મે પાતુ પઙ્કજા ॥ ૨૩॥

મયા કૃતં ચ યત્કિઞ્ચિત્તત્સર્વં પાતુ સેન્દિરા ।
મમાયુરવતાત્ લક્ષ્મીઃ ભાર્યાં પુત્રાંશ્ચ પુત્રિકા ॥ ૨૪॥

મિત્રાણિ પાતુ સતતમખિલાનિ હરિપ્રિયા ।
પાતકં નાશયેત્ લક્ષ્મીઃ મહારિષ્ટં હરેદ્રમા ॥ ૨૫॥

મમારિનાશનાર્થાય માયામૃત્યું જયેદ્બલમ્ ।
સર્વાભીષ્ટં તુ મે દદ્યાત્ પાતુ માં કમલાલયા॥ ૨૬॥

ફલશ્રુતિઃ ।
ય ઇદં કવચં દિવ્યં રમાત્મા પ્રયતઃ પઠેત્ ।
સર્વસિદ્ધિમવાપ્નોતિ સર્વરક્ષાં તુ શાશ્વતીમ્ ॥ ૨૭॥

દીર્ઘાયુષ્માન્ ભવેન્નિત્યં સર્વસૌભાગ્યકલ્પકમ્ ।
સર્વજ્ઞઃ સર્વદર્શી ચ સુખદશ્ચ શુભોજ્જ્વલઃ ॥ ૨૮॥

સુપુત્રો ગોપતિઃ શ્રીમાન્ ભવિષ્યતિ ન સંશયઃ ।
તદ્ગૃહે ન ભવેદ્બ્રહ્મન્ દારિદ્ર્યદુરિતાદિકમ્ ॥ ૨૯॥

નાગ્નિના દહ્યતે ગેહં ન ચોરાદ્યૈશ્ચ પીડ્યતે ।
ભૂતપ્રેતપિશાચાદ્યાઃ સંત્રસ્તા યાન્તિ દૂરતઃ ॥ ૩૦॥

લિખિત્વા સ્થાપયેદ્યત્ર તત્ર સિદ્ધિર્ભવેત્ ધ્રુવમ્ ।
નાપમૃત્યુમવાપ્નોતિ દેહાન્તે મુક્તિભાગ્ભવેત્ ॥ ૩૧॥

આયુષ્યં પૌષ્ટિકં મેધ્યં ધાન્યં દુઃસ્વપ્નનાશનમ્ ।
પ્રજાકરં પવિત્રં ચ દુર્ભિક્ષર્તિવિનાશનમ્ ॥ ૩૨॥

ચિત્તપ્રસાદજનનં મહામૃત્યુપ્રશાન્તિદમ્ ।
મહારોગજ્વરહરં બ્રહ્મહત્યાદિશોધનમ્ ॥ ૩૩॥

મહાધનપ્રદં ચૈવ પઠિતવ્યં સુખાર્થિભિઃ ।
ધનાર્થી ધનમાપ્નોતિ વિવહાર્થી લભેદ્વધૂમ્ ॥ ૩૪॥

વિદ્યાર્થી લભતે વિદ્યાં પુત્રાર્થી ગુણવત્સુતમ્ ।

રાજ્યાર્થી રાજ્યમાપ્નોતિ સત્યમુક્તં મયા શુક ॥ ૩૫॥

એતદ્દેવ્યાઃપ્રસાદેન શુકઃ કવચમાપ્તવાન્ ।
કવચાનુગ્રહેણૈવ સર્વાન્ કામાનવાપ સઃ ॥ ૩૬॥

ઇતિ લક્ષ્મીકવચં બ્રહ્મસ્તોત્રં સમાપ્તમ્ ।

Encoded and proofread by K S Ramachndran ksrkal at dataone.in

*ShrI Laxmi Kavacham 2*

pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*